# parAtriMshikA athavA parAtrIshikA

# પરાત્રિંશિકા અથવા પરાત્રીશિકા

## Document Information

Text title : parAtriMshikA

File name : parAtriMshikA.itx

Category : shiva, kAshimIrashaivadarshanam

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Latest update : July 19, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 22, 2022

*sanskritdocuments.org*

# parAtriMshikA athavA parAtrIshikA

# પરાત્રિંશિકા અથવા પરાત્રીશિકા

॥ ૐ તત્સત્સ્વપ્રકાશાનન્દવપુષે શિવાય નમઃ ॥

॥ ૐ અભિનવચમત્કારાત્મને શિવાય નમઃ ॥

(અનુત્તરસૂત્ર, ત્રિકસૂત્ર, ત્રિકાગમ)

શ્રી દેવી ઉવાચ ।
અનુત્તરં કથં દેવ સદ્યઃ કૌલિકસિદ્ધિદમ્ ।
યેન વિજ્ઞાતમાત્રેણ ખેચરીસમતાં વ્રજેત્ ॥ ૧॥

એતદ્ગુહ્યં મહાગુહ્યં કથયસ્વ મમ પ્રભો ।
હૃદયસ્થા તુ યા શક્તિઃ કૌલિકી કુલનાયિકા ।
તાં મે કથય દેવેશ યેન તૃપ્તિં લભામ્યહમ્ ॥ ૨॥

શ્રીભૈરવ ઉવાચ ।
શ‍ૃણુ દેવિ મહાભગે ઉત્તરસ્યાપ્યનુત્તરમ્ ॥ ૩॥

કૌલિકોઽયં વિધિર્દેવિ મમ હૃદ્વ્યોમ્ન્યવસ્થિતઃ ।
કથયામિ સુરેશાનિ સદ્યઃ કૌલિકસિદ્ધિદમ્ ॥૪॥

અથાદ્યાસ્તિથયઃ સર્વે સ્વરા બિન્દ્વવસાનગાઃ । (સર્વાઃ)
તદન્તઃ કાલયોગેન સોમસૂર્યૌ પ્રકીર્તિતૌ ॥ ૫॥

પૃથિવ્યાદીનિ તત્ત્વાનિ પુરુષાન્તાનિ પઞ્ચસુ ।
ક્રમાત્કાદિષુ વર્ગેષુ મકારાન્તેષુ સુવ્રતે ॥ ૬॥

વાય્વગ્નિસલિલેન્દ્રાણાં ધારણાનાં ચતુષ્ટયમ્ ।
તદૂર્ધ્વં શાદિ વિખ્યાતં પુરસ્તાદ્બ્રહ્મપઞ્ચકમ્ ॥ ૭॥ (તદૂર્ધ્વે)

અમૂલા તત્ક્રમાજ્જ્ઞેયા ક્ષાન્તા સૃષ્ટિરુદાહૃતા ।
સર્વેષામેવ મન્ત્રાણાં વિદ્યાનાઞ્ચ યશસ્વિનિ ॥ ૮॥ (સર્વેષાં ચૈવ)

ઇયં યોનિઃ સમાખ્યાતા સર્વતન્ત્રેષુ સર્વદા ।

ચતુર્દશયુતં ભદ્રે તિથીશાન્તસમન્વિતમ્ ॥ ૯॥

તૃતીયં બ્રહ્મ સુશ્રોણિ હૃદયં ભૈરવાત્મનઃ ।
એતન્નાયોગિનીજાતો નારુદ્રો લભતે સ્ફુટમ્ ॥૧૦॥

હૃદયં દેવદેવસ્ય સદ્યો યોગવિમુક્તિદમ્ । (યોગવિમોક્ષદમ્)
અસ્યોચ્ચારે કૃતે સમ્યઙ્મન્ત્રમુદ્રાગણો મહાન્ ॥ ૧૧॥

સદ્યસ્તન્મુખતામેતિ સ્વદેહાવેશલક્ષણમ્ ।
મુહૂર્તં સ્મરતે યસ્તુ ચુમ્બકેનાભિમુદ્રિતઃ ॥ ૧૨॥ (મન્ત્રિતઃ)

સ બધ્નાતિ તદા સર્વં દેહં મન્ત્રમુદ્રાગણં નરઃ । (*બધ્નાનિ)
(સંબધ્નાતિ તદા સર્વં મન્ત્રમુદ્રાગણં નરઃ ।)
અતીતાનાગતાનર્થાન્ પૃષ્ટોઽસૌ કથયત્યપિ ॥ ૧૩॥ (*પ્ટષ્ટોઽસૌ)

પ્રહરાદ્યદભિપ્રેતં દેવતારૂપમુચ્ચરન્ ।
સક્ષાત્પશ્યત્યસન્દિગ્ધમાકૃષ્ટં રુદ્રશક્તિભિઃ ॥ ૧૪॥

પ્રહરદ્વયમાત્રેણ વ્યોમસ્થો જાયતે સ્મરન્ ।
ત્રયેણ માતરઃ સર્વા યોગીશ્વર્યો મહાબલાઃ ॥ ૧૫॥ (યોગેશ્વર્યો)

વીરા વીરેશ્વરાઃ સિદ્ધા બલવાઞ્છાકિનીગણઃ ।
આગત્ય સમયં દત્ત્વા ભૈરવેણ પ્રચોદિતાઃ ॥ ૧૬॥ (લબ્ધ્વા)

યચ્છન્તિ પરમાં સિદ્ધિં ફલં યદ્વા સમીહિતમ્ ।
અનેન સિદ્ધાઃ સેત્સ્યન્તિ સાધયન્તિ ચ મન્ત્રિણઃ ॥ ૧૭॥

યત્કિઞ્ચિદ્ભૈરવે તન્ત્રે સર્વમસ્માત્પ્રસિદ્ધ્યતિ ।
અદૃષ્ટમણ્ડલોઽપ્યેવં ............ ॥ ૧૮॥ (યઃ કશ્ચિદ્વેત્તિ તત્ત્વતઃ)
(મન્ત્રવીર્યસમાવેશપ્રભાવાન્ન નિયન્ત્રણા ॥ ૧૮॥)
(મન્ત્રવીર્યસમાવેશે ન કદાચિન્નિયન્ત્રણા ॥ ૧૮॥)

અદૃષ્ટમણ્ડલોઽપ્યેવં યઃ કશ્ચિદ્વેત્તિ તત્ત્વતઃ । / ॥ ૧૮॥
સ સિદ્ધિભાગ્ભવેન્નિત્યં સ યોગી સ ચ દીક્ષીતઃ ॥ ૧૮ / ૧૯॥

અનેન જ્ઞાતમાત્રેણ જ્ઞાયતે સર્વશક્તિભિઃ ।
શાકિનીકુલસામાન્યો ભવેદ્યોગં વિનાપિ હિ ॥ ૧૯ / ૨૦॥

અવિધિજ્ઞો વિધાનજ્ઞો જાયતે યજનં પ્રતિ ॥૨૦॥ / ॥ ૨૧॥

કાલાગ્નિમાદિતઃ કૃત્વા માયાન્તમ્બ્રહ્મદેહગમ્ ।

શિવો વિશ્વાદ્યનન્તાન્તઃ પરં શક્તિત્રયં મતમ્ ॥ ૨૧ / ૨૨ ॥

તદન્તર્વર્તિ યત્કિઞ્ચિચ્છુદ્ધમાર્ગે વ્યવસ્થિતમ્ ।
અણુર્વિશુદ્ધમચિરાદૈશ્વરં જ્ઞાનમશ્નુતે ॥ ૨૨ / ૨૩ ॥

તચ્ચોદકઃ શિવો જ્ઞેયઃ સર્વજ્ઞઃ પરમેશ્વરઃ । (શિવોऽજ્ઞેયઃ)
સર્વગો નિર્મલઃ સ્વચ્છસ્તૃપ્તઃ સ્વાયતનઃ શુચિઃ ॥ ૨૩ / ૨૪ ॥

યથા ન્યગ્રોધબીજસ્થઃ શક્તિરૂપો મહાદ્રુમઃ ।
તથા હૃદયબીજસ્થં જગદેતચ્ચરાચરમ્ ॥ ૨૪ / ૨૫ ॥

એવં યો વેત્તિ તત્ત્વેન તસ્ય નિર્વાણગામિની ।
દીક્ષા ભવત્યસન્દિગ્ધા તિલાજ્યાહુતિવર્જિતા ॥ ૨૫ / ૨૬ ॥

મૂર્ધ્નિ વક્ત્રે ચ હૃદયે ગુહ્યે મૂર્તૌ તથૈવ ચ ।
ન્યાસં કૃત્વા શિખાં બદ્ધ્વા સપ્તવિંશતિમન્ત્રિતામ્ ॥ ૨૬ / ૨૭ ॥

એકૈકં તુ દિશાં બન્ધં દશાનામપિ યોજયેત્ । (એકૈકેન દિશાં) (કારયેત્)
તાલત્રયં પુરા દત્ત્વા સશબ્દં વિઘ્નશાન્તયે ॥ ૨૭ / ૨૮ ॥

શિખાસઙ્ખ્યાભિજપ્તેન તોયેનાભ્યુક્ષયેત્તતઃ ।
પુષ્પાદિકં ક્રમાત્સર્વં લિઙ્ગે વા સ્થણ્ડિલેऽથવા ॥ ૨૮ / ૨૯ ॥ (સ્થણ્ડિલઞ્ચ વા)

ચતુર્દશાભિજપ્તેન પુષ્પેણાસનકલ્પના ।
તત્ર સૃષ્ટિં યજેદ્વીરઃ પુનરેવાસનં તતઃ ॥ ૨૯ / ૩૦ ॥ (તતઃ)

સૃષ્ટિં તુ સમ્પુટીકૃત્ય પશ્ચાદ્યજનમારભેત્ ।(પુનર્યજનમારભેત્)
સર્વતત્ત્વસુસમ્પૂર્ણાં સર્વાભરણભૂષિતામ્ ॥ ૩૦ / ૩૧ ॥ (સર્વાવયવશોભિતામ્)

યજેદ્દેવીં મહેશાનીં સપ્તવિંશતિમન્ત્રિતામ્ । (મહાભાગાં)
તતઃ સુગન્ધિપુષ્પૈસ્તુ યથાશક્ત્યા સમર્ચયેત્ ॥ ૩૧ / ૩૨ ॥ (સુગન્ધિપુષ્પૈશ્ચ)

પૂજયેત્પરયા ભક્ત્યા આત્માનં ચ નિવેદયેત્ । (સ્વાત્મનં)
એવં યજનમાખ્યાતમગ્નિકાર્યેऽપ્યયં વિધિઃ ॥ ૩૨ / ૩૩ ॥

કૃતપૂજાવિધિઃ સમ્યક્સ્મરન્બીજં પ્રસિદ્ધ્યતિ ॥ ૩૪ ॥

આદ્યન્તરહિતં બીજં વિકસત્તિથિમધ્યગમ્ ।
હૃત્પદ્માન્તર્ગતં ધ્યાયેત્ સોમાંશં નિત્યમભ્યસ્યેત્ ॥ ૩૩ / ૩૫ ॥ (સોમાંશુ)

યાન્યાન્કામયતે કામાંસ્તાન્તાઞ્છીઘ્રમવાપ્નુયાત્ ।

અસ્માત્પ્રત્યક્ષતામેતિ સર્વજ્ઞત્વં ન સંશયઃ ॥ ૩૪ / ૩૬ ॥ (અજ્ઞઃ પ્રત્યક્ષતામેતિ)

એવં મન્ત્રફલાવાપ્તિરિત્યેતદ્રુદ્રયામલમ્ ।
એતદભ્યાસતઃ સિદ્ધિઃ સર્વજ્ઞત્વમવાપ્યતે ॥ ૩૫ / ૩૭ ॥ (સર્વજ્ઞત્વમવાપ્નુયાત્)

॥ ઇતિ શમ્ ॥

The referenced books include the Commentaries (laghu-vRRitti and vivRRiti) by Acharya Abhinavagupta on the concluding verses of the Rudrayamala Tantra that comprise the text of the parAtrIshikA / parAtriMshikA.

The referenced books have minor variations in the numbering and line clubbing of the verses, some of which have been captured above. Word variations are found between these texts (including those between vRRitti and vivRRiti) and have been incorporated for the benefit of the reader.

Two words that have been marked "*" appear to be print errors.

Encoded and proofread by Ruma Dewan

---

*parAtriMshikA athavA parAtrIshikA*
pdf was typeset on July 22, 2022

Please send corrections to *sanskrit@cheerful.com*